दुर्गा सप्तशती — अध्याय 10

Durga Saptashati — Chapter 10

Source: Selected 1894 ancient core — chapter 10. Also compared: Opening — physical scan 236; Ending and colophon — physical scan 246; Verified 1894 imprint — physical scan 7; Ancient Sanskrit comparison only.

प्रारम्भ — वक्ता

SPEAKER

ऋषिरुवाच।

ṛṣiruvāca|

अध्याय 10 — शुम्भ-वध

TEXT POSITION 1

निशुम्भं निहतं दृष्ट्वा भ्रातरं प्राणसंमितम्।
हन्यमानं बलं चैव शुम्भः क्रुद्धोऽब्रवीद्वचः॥

niśumbhaṃ nihataṃ dṛṣṭvā bhrātaraṃ prāṇasaṃmitam|
hanyamānaṃ balaṃ caiva śumbhaḥ kruddho'bravīdvacaḥ||

TEXT POSITION 2

बलावलेपाद्दुष्टे त्वं मा दुर्गे गर्वमावह।
अन्यासां बलमाश्रित्य युध्यसे यातिमानिनी॥

balāvalepāddusṭe tvaṃ mā durge garvamāvaha|
anyāsāṃ balamāśritya yudhyase yātimāninī||

TEXT POSITION 3

देव्युवाच।
एकैवाहं जगत्यत्र द्वितीया का ममापरा।
पश्यैता दुष्ट मय्येव विशन्त्यो मद्विभूतयः॥

devyuvāca|
ekaivāhaṃ jagatyatra dvitīyā kā mamāparā|
paśyaitā duṣṭa mayyeva viśantyo madvibhūtayaḥ||

TEXT POSITION 4

ततः समस्तास्ता देव्यो ब्रह्माणीप्रमुखा लयम्।
तस्या देव्यास्तनौ जग्मुरेकैवासीत्तदाम्बिका॥

tataḥ samastāstā devyo brahmāṇīpramukhā layam|
tasyā devyāstanau jagmurekaivāsīttadāmbikā||

TEXT POSITION 5

देव्युवाच।
अहं विभूत्या बहुभिरिह रूपैर्यदास्थिता।
तत्संहृतं मयैकैव तिष्ठाम्याजौ स्थिरो भव॥

devyuvāca|
ahaṃ vibhūtyā bahubhiriha rūpairyadāsthitā|
tatsaṃhṛtaṃ mayaikaiva tiṣṭhāmyājau sthiro bhava||

TEXT POSITION 6

ततः प्रववृते युद्धं देव्याः शुम्भस्य चोभयोः।
पश्यतां सर्वदेवानामसुराणां च दारुणम्॥

tataḥ pravavṛte yuddhaṃ devyāḥ śumbhasya cobhayoḥ|
paśyatāṃ sarvadevānāmasurāṇāṃ ca dāruṇam||

TEXT POSITION 7

शरवर्षैः शितैः शस्त्रैस्तथास्त्रैश्चैव दारुणैः।
तयोर्युद्धमभूद्भूयः सर्वलोकभयंकरम्॥

śaravarṣaiḥ śitaiḥ śastraistathāstraiścaiva dāruṇaiḥ|
tayoryuddhamabhūdbhūyaḥ sarvalokabhayaṃkaram||

TEXT POSITION 8

दिव्यान्यस्त्राणि शतशो मुमुचे यान्यथाम्बिका।
बभञ्ज तानि दैत्येन्द्रस्तत्प्रतीघातकर्तृभिः॥

divyānyastrāṇi śataśo mumuce yānyathāmbikā|
babhañja tāni daityendrastatpratīghātakartṛbhiḥ||

TEXT POSITION 9

मुक्तानि तेन चास्त्राणि दिव्यानि परमेश्वरी।
बभञ्ज लीलयैवोग्रहुंकारोच्चारणादिभिः॥

muktāni tena cāstrāṇi divyāni parameśvarī|
babhañja līlayaivograhuṃkāroccāraṇādibhiḥ||

TEXT POSITION 10

ततः शरशतैर्देवीमाच्छादयत सोऽसुरः।
सापि तत्कुपिता देवी धनुश्चिच्छेद चेषुभिः॥

tataḥ śaraśatairdevīmācchādayata so'suraḥ|
sāpi tatkupitā devī dhanuścicccheda ceṣubhiḥ||

TEXT POSITION 11

छिन्ने धनुषि दैत्येन्द्रस्तथा शक्तिमथाददे।
चिच्छेद देवी चक्रेण तामप्यस्य करेस्थिताम्॥

chinne dhanuṣi daityendrastathā śaktimathādade|
ciccheda devī cakreṇa tāmapyasya karesthitām||

TEXT POSITION 12

ततः खड्गमुपादाय शतचन्द्रं च भानुमत्।
अभ्यधावत तां देवीं दैत्यानामधिपेश्वरः॥

tataḥ khaḍgamupādāya śatacandraṃ ca bhānumat|
abhyadhāvata tāṃ devīṃ daityānāmadhipeśvaraḥ||

TEXT POSITION 13

तस्यापतत एवाशु खड्गं चिच्छेद चण्डिका।
धनुर्मुक्तैः शितैर्बाणैश्चर्म चार्ककरामलम्॥

tasyāpatata evāśu khaḍgaṃ ciccheda caṇḍikā|
dhanurmuktaiḥ śitairbāṇaiścarma cārkakarāmalam||

TEXT POSITION 14

हताश्वः स तदा दैत्यश्छिन्नधन्वा विसारथिः।
जग्राह मुद्गरं घोरमम्बिकानिधनोद्यतः॥

hatāśvaḥ sa tadā daityaścchinnadhanvā visārathiḥ|
jagrāha mudgaraṃ ghoramambikānidhanodyataḥ||

TEXT POSITION 15

चिच्छेदापततस्तस्य मुद्गरं निशितैः शरैः।
तथापि सोऽभ्यधावत्तां मुष्टिमुद्यम्य वेगवान्॥

cicchedāpatatastasya mudgaraṃ niśitaiḥ śaraiḥ|
tathāpi so'bhyadhāvattāṃ muṣṭimudyamya vegavān||

TEXT POSITION 16

स मुष्टिं पातयामास हृदये दैत्यपुंगवः।
देव्यास्तं चापि सा देवी तलेनोरस्यताडयत्॥

sa muṣṭiṃ pātayāmāsa hṛdaye daityapuṃgavaḥ|
devyāstaṃ cāpi sā devī talenorasyatāḍayat||

TEXT POSITION 17

तलप्रहाराभिहतो निपपात महीतले।
स दैत्यराजः सहसा पुनरेव तथोत्थितः॥

talaprahārābhihato nipapāta mahītale|
sa daityarājaḥ sahasā punareva tathotthitaḥ||

TEXT POSITION 18

उत्पत्य च प्रगृह्योच्चैर्देवीं गगनमास्थितः।
तत्रापि सा निराधारा युयुधे तेन चण्डिका॥

utpatya ca pragṛhyoccairdevīṃ gaganamāsthitaḥ|
tatrāpi sā nirādhārā yuyudhe tena caṇḍikā||

TEXT POSITION 19

नियुद्धं खे तदा दैत्यश्चण्डिका च परस्परम्।
चक्रतुः प्रथमं युद्धं मुनिसिद्धविस्मयकारकम्॥

niyuddhaṃ khe tadā daityaścaṇḍikā ca parasparam|
cakratuḥ prathamaṃ yuddhaṃ munisiddhavismayakārakam||

Note: The enlarged selected print has मुनिसिद्ध and a second युद्धं. Both are retained despite the comparison's shorter wording.

TEXT POSITION 20

ततो नियुद्धं सुचिरं कृत्वा तेनाम्बिका सह।
उत्पाट्य भ्रामयामास चिक्षेप धरणीतले॥

tato niyuddhaṃ suciraṃ kṛtvā tenāmbikā saha|
utpāṭya bhrāmayāmāsa cikṣepa dharaṇītale||

TEXT POSITION 21

स क्षिप्तो धरणीं प्राप्य मुष्टिमुद्यम्य वेगितः।
अभ्यधावत दुष्टात्मा चण्डिकानिधनेच्छया॥

sa kṣipto dharaṇīṃ prāpya muṣṭimudyamya vegitaḥ|
abhyadhāvata duṣṭātmā caṇḍikānidhanecchayā||

TEXT POSITION 22

तमायान्तं ततो देवी सर्वदैत्यजनेश्वरम्।
जगत्यां पातयामास भित्त्वा शूलेन वक्षसि॥

tamāyāntaṃ tato devī sarvadaityajaneśvaram|
jagatyāṃ pātayāmāsa bhittvā śūlena vakṣasi||

TEXT POSITION 23

स गतासुः पपातोर्व्यां देवीशूलाग्रविक्षतः।
चालयन्सकलां पृथ्वीं साब्धिद्वीपां सपर्वताम्॥

sa gatāsuḥ papātorvyāṃ devīśūlāgravikṣataḥ|
cālayansakalāṃ pṛthvīṃ sābdhidvīpāṃ saparvatām||

TEXT POSITION 24

उत्पातमेघाः सोल्का ये प्रागासंस्ते शमं ययुः।
सरितो मार्गवाहिन्यस्तथासंस्तत्र पातिते॥

utpātameghāḥ solkā ye prāgāsaṃste śamaṃ yayuḥ|
sarito mārgavāhinyastathāsaṃstatra pātite||

Note: The selected print places the omens and rivers before the restored-world passage at position 25; the comparison orders these differently.

TEXT POSITION 25

ततः प्रसन्नमखिलं हते तस्मिन्दुरात्मनि।
जगत्स्वास्थ्यमतीवाप निर्मलं चाभवन्नभः॥

tataḥ prasannamakhilaṃ hate tasmindurātmani|
jagatsvāsthyamatīvāpa nirmalaṃ cābhavannabhaḥ||

TEXT POSITION 26

ततो देवगणाः सर्वे हर्षनिर्भरमानसाः।
बभूवुर्निहते तस्मिन् गन्धर्वा ललितं जगुः॥

tato devagaṇāḥ sarve harṣanirbharamānasāḥ|
babhūvurnihate tasmin gandharvā lalitaṃ jaguḥ||

TEXT POSITION 27

अवादयंस्तथान्ये ननृतुश्चाप्सरोगणाः।
ववुः पुण्यास्तथा वाताः सुप्रभोऽभूद्दिवाकरः॥

avādayaṃstathānye nanṛtuścāpsarogaṇāḥ|
vavuḥ puṇyāstathā vātāḥ suprabho'bhūddivākaraḥ||

HALF-VERSE 28

जज्वलुश्चाग्नयः शान्ताः शान्ता दिग्जनितस्वनाः॥

jajvaluścāgnayaḥ śāntāḥ śāntā digjanitasvanāḥ||

समापन — पुष्पिका

COLOPHON

इति श्रीमार्कण्डेयपुराणे शुम्भवधो नाम दशमोऽध्यायः॥१०॥

iti śrīmārkaṇḍeyapurāṇe śumbhavadho nāma daśamo'dhyāyaḥ||10||